शक्योऽस्य मन्युर्भवता विनेतुमिति रघुः । रजःपरिणामभेदो न शक्यते प्रत्याख्यातुमिति तत्त्वकौमुद्यां वाचस्पतिमिश्रः । शक्या मखेनापि मुदोऽमराणामिति नैषधम् । इति दुर्गादासः ॥

शक, य ञ शक्तौ । इति कविकल्पद्रुमः ॥ (दिवा० उभ०-सक०-सेट् । ) शक्तिर्दिवादिपक्षे क्षमा स्वादिपक्षे सामर्थ्यम् । य ञ, शक्यति शक्यते दुःखं दीनः । इति दुर्गादासः ।

शकः, पुं, (शक + अच् ।) जातिभेदः । नृपभेदः । इति मेदिनी ॥ स च नृपः शकादित्यः इति शालिवाहन इति च नाम्ना ख्यातः । तस्य मरणदिनावधि वत्सरगणनाङ्कः शकाब्देति नाम्ना पञ्जिकायां लिख्यते । स च म्लेच्छजातिविशेषः । सत्ययुगे सगरराजेनास्य मस्तकार्द्धं मुण्डयित्वा वेदबाह्यत्वमकारि । यथा,—

"ततः शकान् सयवनान् काम्बोजान् पारदांस्तथा ।
पह्लवांश्चापि निःशेषान् कर्त्तुं व्यवसितो नृपः ॥
ते हन्यमाना वीरेण सगरेण महौजसा ।
वशिष्ठं शरणं जग्मुः सूर्य्यवंशपुरोहितम् ॥
वशिष्ठः शरणापन्नान समये स्थाप्य तानृषिः ।
सगरं वारयामास तेभ्यो दत्त्वाभयं तदा ॥
सगरस्तां प्रतिज्ञान्तु निशम्य सुमहाबलः ।
धर्म्मं जघान तेषाञ्च वेशानन्यांश्चकार ह ॥
अर्द्धं शिरः शकानान्तु मुण्डयामास भूपतिः ।
जवनानां शिरः सर्व्वं काम्बोजानामपि द्विज ॥
पारदान्मुक्तकेशांस्तु पह्लवान् श्मश्रुधारिणः ।
निःस्वाध्यायवषट्कारान् सर्व्वानेव चकार ह ॥"

इति पाद्मे स्वर्गखण्डे सगरोपाख्यानम् १५ अः ॥ देशभेदः । इति विश्वः ॥ ( यथा, मात्स्ये । १२० । ४५ ।

"तुषारान् वर्व्वरान् कारान् पह्लवान् पारदान् शकान् ।
एतान् जनपदान् मङ्क्षु प्लावयित्वोदधिं गता ॥")

शकटः, पुं, क्ली, ( शक्नोति भारं वोढुमिति । शक् + "शकादिभ्योऽटन् ।" उणा० ४ । ८१ । इति अटन् ! ) यानविशेषः । गाड़ी इति भाषा ॥ तत्पर्य्यायः । अनः २ । इत्यमरः ॥ अक्षः ३ । इति शब्दरत्नावली ॥ विष्णुवध्यासुरविशेषः ! द्विसहस्रपलपरिमाणम् । तत्पर्य्यायः । भारः २ आचितः ३ शाकटीनः ४ शलाटः ५ । इति हेमचन्द्रः ॥ उक्तञ्च ।

"शकटः शाकिनी गावो यानमस्कन्दनं वनम् ।
अनूपः पर्व्वतो राजा दुर्भिक्षे नव वृत्तयः ॥"

इति भरतः ॥ तिनिसवृक्षः । इति राजनिर्घण्टः ॥ ( व्यूहविशेषः । यथा, मनुः । ७ । १८७ ।

"दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा ॥"

शकटाकृतित्वात् रोहिणीनक्षत्रम् । यथा बृहत्संहितायाम् । २४ । ३० ।

"रोहिणीशकटमध्यसंस्थिते
चन्द्रमस्यशरणीकृता जनाः ।
क्वापि यान्ति शिशुयाचिताशनाः
सूर्य्यतप्तपिठराम्बुपायिनः ॥" )

शकटहा, [ न् ] पुं, ( शकटं हन्तीति । हन् + क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः ॥ (एतद्विवरणं भागवते १० स्कन्धे ७ अध्याये तथा हरिवंशे ६१ अध्याये च द्रष्टव्यम ॥ ) शकटनाशके, त्रि ॥

शकटाह्वा, स्त्री, (शकटमिति आह्वा यस्याः ।) रोहिणीनक्षत्रम । तस्याः पञ्चतारामयशकटाकृतित्वात् ॥

शकलं, क्ली, (शक्नोतीति । शक् + "शकिशम्योर्नित् ।" उणा० १ । १११ । इति कलः । ) त्वक् । खण्डम् । ( यथा, रघुः । २ । ४६ ।

"अथान्धकारं गिरिगह्वराणां
दंष्ट्रामयूखैः शकलानि कुर्व्वन् ॥" )

रागवस्तु । वल्कलम् । इति मेदिनी ॥ शल्कम् । आँश इतिभाषा । इति शकलिन्शब्ददर्शतात् ॥

शकलः, पुं, क्ली, ( शक् + कलः । ) एकदेशः । ( यथा, मनुः । ६ । ८८ ।

"प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥")

खण्डम् । यथा,—

"भित्तं शकलखण्डे वा पुंस्यर्द्धोऽर्द्धं समेऽंशके ॥"

इत्यमरः ॥

( यथा, मनुः । १ । १३ ।

"ताभ्यां स शकलाभ्याञ्च दिवंभूमिञ्च निर्म्ममे ॥")

शकली, [न्] पुं, (शकलमस्यास्तीति । इनिः ।) मत्स्यः । इत्यमरः ॥

शकान्तकः, पुं, ( शकस्य म्लेच्छजातिविशेषस्य अन्तकः ।) विक्रमादित्यराजः । इति केचित् ॥

शकारः, पुं, राज्ञः अनूढ़ायाः स्त्रिया भ्राता । यथा, साहित्यदर्पणे ३ परिच्छेदे ॥

"मदमूर्खताभिमानी दुष्कुलतैश्वर्य्यसंयुक्तः ।
सोऽयमनूढ़ाभ्राता राज्ञः श्यालः शकार इत्युक्तः ॥"

शकारिः, पुं, (शकस्य म्लेच्छजातिविशेषस्यारिः शत्रुः । ) विक्रमादित्यराजः । स तु उज्जयनीदेशाधिपतिः । यथा,—

"साहसाङ्कः शकारिः स्याद्विक्रमादित्य इत्यपि ॥"

इति जटाधरः ॥

शकुनं, क्ली, (शक्नोति शुभाशुभं विज्ञातुमनेनेति । शक् + "शकेरुनोन्तोन्त्युनयः ।" उणा० ३ । ४९ । इति उनः । ) शुभशंसिनिमित्तम् । इति मेदिनी ॥ सगुन इतिहिन्दीभाषा । फललक्षणम् । इत्यजयपालः ॥ * ॥ अथ शुभशकुनानि ।

"कीर्त्तनात् श्रवणतो विलोकनात्
स्पर्शनात् समधिकं समोत्तरम् ।
मङ्गलाय दधिचन्दनादिकं
स्यात् प्रवासभवनप्रवेशयोः ॥
दध्याज्यदूर्व्वाक्षतपूर्णकुम्भाः
सिद्धान्नसिद्धार्थकचन्दनानि ।
आदर्शशङ्खामिषमीनमृत्स्ना-
गोरोचनागोमयगोमधूलिः ॥
गीर्व्वाणवीणाफलभद्रपीठ-
पुष्पाञ्जनालङ्करणायुधानि ।
ताम्बूलयानासनवर्द्धमान-
ध्वजातपत्रव्यजनाम्बराणि ॥
अम्भोजभृङ्गारसमृद्धवह्नि-
गजाजवाह्याः कुशचामराणि ।
रत्नानि चामीकररूप्यताम्र-
बद्धैड़काश्चौषधयः सुराश्च ॥
वनस्पतेर्नूतनशाकमेवं
माङ्गल्यपञ्चाशदिदं प्रदिष्टम् ।
शुभेषु कार्य्येष्वशुभेषु चैव
कार्य्ये गतानां शुभदाः सदैव ॥
एतानि दृष्ट्वा शुभदर्शनानि
कुर्व्वन्ति दृष्टः पथि दक्षिणेन ।
सकृद्विलोकादशुभावहानि
त्यक्तानि नामेन शुभा भवन्ति ॥
गान्धारषड़्जावृषभस्तथान्ये
स्वरेषु गम्भीरमनोरमा ये ।
वादित्रवेदध्वनिगीतनृत्य-
मित्यादिशस्तं किल यत्र रौद्रम् ॥
आदाय रिक्तं कलसं जलार्थी
यदि व्रजेत् कोऽपि सहाध्वगेन ।
पूर्णं समादाय निवर्त्ततेऽसौ
यथा कृतार्थः पथिकस्तथैव ॥ * ॥
अङ्गारभस्मेन्धनरज्जुपङ्क-
पिण्याककार्पासतुषास्थिविष्ठाः ।
कृष्णायसावस्करकृष्णधान्य-
पाषाणकेशा भुजगौषधानि ॥
तैलं गुड़ं चर्म्म वसा विभिन्नं
रिक्तञ्च भाण्डं लवणं तृणञ्च ।
तक्रार्गला शृङ्खलवृष्टिवाताः
कार्य्ये क्वचित् त्रिंशदिमे न शस्ताः ॥ * ॥
स्वपादयानस्खलनं नृपाणां
भङ्गः क्वचिद्यानपलायनञ्च ।
द्वाराभिघाताध्वगशस्त्रपाताः
प्रस्थानविघ्नं कथयन्तु यातुः ॥
मार्ज्जारयुद्धारवदर्शनानि
कलिः कुटुम्बस्य परस्परञ्च ।
चित्तस्य कालुष्यकरञ्च सर्व्वं
गन्तुः प्रयाणप्रतिषेधनाय ॥
दृष्टे शवे रोदनशब्दहीने
महार्थसिद्धिः कथितोद्यमेषु ॥
गृहप्रवेशेषु शवः शवत्वं
रुजं सदीर्घामथवा ददाति ॥
गण्डूषमावर्जयतां नराणा-
मन्तर्गलं चेत् प्रविशत्यकस्मात् ।
भवेत् तदाभीप्सितसौख्यलाभो
यः कौतुकी तेन निरूप्यमेतत् ॥
उज्झितं झटिति दन्तधावनं
संमुखं पतति यत्र वासरे ।
भोजनं भवति तत्र वाञ्छितं
व्यासभाषितमिदं हि नानृतम् ॥"